# पुनरपि गोकुलं प्रति
**punarapi gokulaM prati**[1]

दारुकः -

धावतं धावतं वाहौ! परमात्मरथं त्विमम्।
सुदीर्घवीथ्या नयतं सुखितस्वप्नसन्निभम्॥ १॥

"गच्छ दारुक! कृष्णेन सहितो गोकुलं प्रति"।
नेयमाज्ञा, प्रसादोऽयं बलरामाद् बहिर्गतः॥ २॥

आलस्यदोऽयं सौधोऽत्रास्त्ययत्नसुलभं सुखम्।
लवणेन विना जीवफलाहारेण किं फलम्॥ ३॥

आशंसेऽहमिमानीह युष्मदर्थं विरोधिनः!।
अक्षुधाकरवैशिष्ट्यपूर्णमिष्टान्नभोजनम्॥ ४॥

विप्रयोगेण रहितानविघ्नप्रणयोत्सवान्।
विना शोणितपातेन सिद्धान् पूर्णजयानपि॥ ५॥ युग्मकम्॥

इष्टं ममैतन्निम्नोच्चपथेन रथचारणम्।
पतेदिदं त्वन्धगर्ते, न मुञ्चे रश्मिकानिमान्॥ ६॥

इष्टं ममात्यासन्नोद्यद्भावविप्लववदर्शनम्।
अगाधहृद्भ्रदोन्माथसौन्दर्यप्रतिभासनम्॥ ७॥

प्रतीक्षमाणाः पश्यन्ति नार्यः स्वस्वविषण्णताम्।
निजजीवितमूल्येन कन्दुकीयति गोकुलम्॥ ८॥

दूरादायान्ति शकटाः पश्चाद् गोनिवहस्य तु।
राजधानीं नयन्त्येते गोरसांश्च यथाविधि॥ ९॥

वासो मलिनमुष्णीषं कञ्चुकः शिथिलालसः।
गोप! साध्वेष वेषस्त्वत्स्वगोपनसमर्थकः॥ १०॥

युष्मन्निधेश्चरित्रं तु सम्यग् जानाति दारुकः।
रथे तस्योपविष्टोऽस्ति गोकुलैकनिधिः खलु॥ ११॥

यस्य भ्रूकुटिविक्षेपः सर्वलोकैकसङ्ग्रहः।
तत्सम्पदधिपास्त्वत्र गोपकुट्यो भवन्त्यहो!॥ १२॥

क्रीडन्ति बालका गावोऽप्यत्र धावन्त्यथोन्मदम्।
अयि शाद्वल! कस्माच्चिल्लेभिषे नीलिमामिमाम्?॥ १३॥

[1]Orginal poem in Malayalam by Etassery Govindan Nair. Translated into Sanskrit by N.V.P.Unithiri, Prof. of Sanskrit, University of Calicut, Kerala.

दूर्वाशष्पाङ्कुरैर्मोदाद् रोमाञ्चावृतगात्रकः।
अद्यापि सन्धारयसि केषाञ्चिद् विमलस्मृतीः॥ १४॥

वृन्दावनप्रसूनानि! निःसीमं वः सुसौरभम्।
आयात्यदम्यतृष्णोऽयं रथे नीलमधुव्रतः॥ १५॥

धावतं धावतं वाहौ! परमात्मरथं त्विमम्।
सुसौख्यवीथ्या नयतं संपुष्यत्स्वप्नसन्निभम्॥ १६॥

गोपिकाः -

सूत! किं नृपस्यन्दनं त्वया
धावयन्निह स्थापितं द्रुतम्?।
स्नानतत्परा गोपिका वयं
सूरजानदीं यातुमुद्यताः॥ १७॥

मातरं चिराद् द्रष्टुमुत्सुको
याति भूमिपः सुप्रतीक्षितः।
मा विळम्बयेमं वृथा, न हि
ज्ञातवानसौ गोपिका इमाः॥ १८॥

पतितनूजपित्रादिबान्धवात्
क्षणमिहैकदा मोचिता वयम्।
मनुजभावतः प्रोत्थिता इमा-
स्तदनु केनचिद् देवपाणिना॥ १९॥

मातरो न नो वल्लभा स्वसा-
रोऽपि नो वयं कस्यचित् तदा।
लीलातत्पराः केवलं वने
या इमा न हि ज्ञातवानयम॥॥ २०॥

सूरजापयःकाळिमा निशा-
चारुता वने नीलिमा च नो।
इष्टमम्बरं, साम्बरा इमा
नैव भूमिपो ज्ञातवानयम्॥ २१॥

सूत! भूपतिस्यन्दनं त्विहा-
नीतवानतो दण्डमर्हसि।
देवलक्ष्यमन्तःपुरं परं
गोकुलं किमानीतवानसि?॥ २२॥

रथ! नृपं विहायात्र यासि किं
द्रुतमये! सदा स्थापितो भव।
व्रजवधूमनोरङ्गमण्डपे
महितमक्रूरस्यन्दनं यथा॥ २३॥

स्थापितं पुरा तापसेश्वरा!
धर्मशास्त्रगं संविधानकम्।
स्तम्भय क्षणं, स्थापयापरं
धर्ममीश्वरा! विश्वमण्डले॥ २४॥

अत्र गोपिकाभिः प्रयुज्यता-
मश्रुतं पुरा नाटकं वरम्।
अत्र विश्वमेकं विधीयतां
भावनामयं चास्मदुद्भवम्॥ २५॥

प्रणयरूप! हे कृष्ण! शीतळे
रविसुतानदीतीरपादपे।
इह विभातजार्कांशुभिः सुमैः
परिसमास्तृते हृद्यमोहने॥ २६॥

विटपसीम्नि सन्मन्दमारुते
समुपविश्य सभ्रूकुटीलयैः।
अतिमनोहरं गानतल्लजं
झटिति वेणुना गाय पूर्ववत्॥ २७॥ युग्मकम्॥

नैव चाम्बराण्यस्मदीयका-
श्चेतनाः समा हर्तुमर्हसि।
आवृतः स्वयं लम्बिताभिरे-
वाभिरास्स्व मन्दस्मितासननः॥ २८॥

व्रीळयावशा मीलिताननाः
शेमहे वयं त्वात्मविस्मृताः।
आवृणीष्व नो वेणुगीतका-
लापनैः कृपावारिधे! तदा॥ २९॥